श्रीरामचरितं ॥ श्रीः ॥

श्रीगणेशायनमः॥अविघ्नमस्तु॥प्रयत्नकेरलदेशेमथितंराष्ट्रिकोटिलिंगपुरं॥श्रीमान्युवराजाख्यस्तत्रास्तेदीर्घदर्शिमुकुटमणिः॥१॥
कालाहिपाकटाक्षक्षपितास्त्रिलकल्मषौघधिषणायं॥रसिकशिरोमणिरुधियामानंदकरंकरोतिसत्काव्यं॥शिवं॥अस्तिक्ष्माणोजगतां
निदाननारायणोनामरुद्राधिनाथः॥विराजमानःफणिराजतल्पेपीयूषभानाविवरुष्यासारः॥१॥रुचर्णचूर्णद्युनिनुन्यकांत्यासमाश्रि
तःसागरकन्ययायः॥विभातिगारुत्मनचारुदेहःक्षणप्रभावानिचकालमेघः॥२॥यासत्वसंघानखिलान्नमस्तेबिभर्त्तिमानेवच्चा
तानजस्रं॥तांपार्श्वसंस्थांधरणीकटाक्षैःप्रीणातियःप्रेमरसाभिषिक्तैः॥३॥यस्योन्नमांगेघनकेशपाशेविराजतिस्वर्णमयःकिरीटः॥
घनप्रतानेविहितोनरीयेस्तनंधयःसूर्यइवोदयाद्रौ॥४॥यस्याननंपद्ममिवप्रफुल्लंवराटकिंजल्कनिभोष्ठदंतं॥पद्माहृदन्तःपक्ष्मि
वाक्षियुग्मंमधुव्रतहृद्यमिवाधिशेते॥५॥करेशरच्चंद्रसमानकांतिर्विराजतेयस्यसकंबुराजः॥विकस्वरेचारुविसप्रसूनेकलिंद-
जायाइवराजहंसः॥६॥चक्रंसहस्रांशुसहस्रशोभंयस्यारिचक्रोन्मथनातिदक्षं॥मुदावहंमूर्त्तमिवस्वतेजःकदापिनोमुंचतिपं
चशारवः॥७॥यस्यासमेयस्यकरप्रमेयेजगत्कटाहाबहवोमहांतः॥पिचंडगर्भेपरिमांतिचित्रंक्षिरण्यगर्भस्यदिनक्षयेषु॥८॥य
न्नाभिकेल्लीसरसीसरोजेभृंगायमाणोभुवनस्यकर्त्ता॥गायन्मुकुर्वेदपदैर्मनोज्ञैःप्रसादयत्यश्रममात्मयोनिं॥९॥चकास्तियश्चं
पककुड्मलस्यप्रमुष्णानाडंबरमंबरेण॥विवेष्टितःकाननकृष्णावर्त्मज्वालाभिरुच्चैरिवनीलशैलः॥१०॥पदेयदीयेयमिनोम
नोसिश्रियःकरेणानिशलाल्यमाने॥विद्रायसर्वान्विषयान्निवासमुशंतिहंसाइवशारदाब्जे॥११॥यस्यायनोमूर्त्तमिवांतरंगंकृतां
जलिःकंजविलोचनस्य॥अभीष्टदिक्प्रापणजागरूकोवसत्यजस्रंविनतानतृजः॥१२॥रसातलंयस्यतलंपदस्यस्वयंभुवो
मंदिरमुत्तमांगं॥विलोचनेवासरयामिनीशोवदंतिविज्ञानदृशःपुमांसः॥१३॥अगोचरंलोचनचित्तवाचामविक्रियंविश्वग
वस्थितंयं॥आत्मानमाद्यंतविहीनमेकमानंदरूपंमुनयोवदंति॥१४॥यत्पादपद्मेसकृदाहितार्चानराःकरींद्रादिपदंप्रपद्य॥
सदारमंतेसहनंदनादौविलासिनोभिर्विगतान्यचिंताः॥१५॥यस्सेवयायानिपुनःशरीरानजातुमातुर्जठरेशयत्वं॥यथापुनर्न

१

वनिवृत्तिमेतितथापरब्रह्ममणिर्लीयतेसः॥१६॥नमोश्वरंविश्वजनार्त्तिनाशंपितामहाद्याखिदशाःकदाचित्॥प्रापुर्दशार्यंविभुजो
ग्रतप्तामहीरुहांमूलमिवानयार्त्ताः॥१७॥शेषेशयानंतमशेषनाथंतेयोगनिद्रासहितंरुधाशाः॥स्तनप्रणामाःकमलायनासंसम
रुवन्नस्तमलैर्वचोभिः॥१८॥नमोस्तुतेनाथजगन्त्रयाणांनिदानभूतायनिराश्रयाय॥स्वमायया मोहयतेसमस्तान्नशरीरभाजोभ
वसिंधुमध्ये॥१९॥सृजन्नशेषंनिजमाययेदंजगत्पुनस्त्वंपरिपालयंश्च॥विनाशयन्रुद्रवलसिवीनसंगोमृदांचयेर्वालइवालयादि
॥२०॥अपारसंसारसमुद्रमग्नान्जनान्नयदीयःसदयःकटाक्षः॥तरीरिवाप्नोत्यतिहिपारंनमःपरस्मैपुरुषायतस्मै॥२१॥इति
स्तुतःसादरमादितेयैर्विमुक्तनिद्रोभगवान्मुकुंदः॥उत्थायसद्यःस्थितवानकर्णीडेस्तधाशनानुरसस्मितमित्युवाच॥२२॥प्र
सादितोहंविबुधामनोज्ञैस्तवेरमाभिःस्तनरांभवद्भिः॥निदानमस्यागमनस्यसद्योनिवेद्यतामद्यनिरस्तशंकं॥२३॥इत्थंवचं
तंभगवंतमेनंजगच्चयीरक्षणजागरूकं॥विवक्षितांविश्वसुधाशनानामुवाचवाचंकलहंसवाद्रः॥२४॥शरीरभाजांभवतोंत
रंगेयवस्थितस्याविदितंनकिंचित्॥निवेद्यतेनाथतथाप्यवस्थाप्रवृत्तिरेषास्वलुसप्रभूणां॥२५॥पूर्वंभवान्नाथहिरण्यपू
र्वेनृसिंहरूपःकशिपुंन्यहिंसीत्॥सरावणोनामभवन्निदानींनिशाचरःपीडयतित्रिलोकीं॥२६॥महाशरीरोदशभिःशि
रोभिर्विराजतेविंशतिबाहुरेषः॥नरुग्रकांडैर्बहुभिश्चभृंगैःशिलोच्चयःप्रोच्चइवांजनाभः॥२७॥विलोकनत्रासितविश्वलो
कःसघोररूपोनिशिचारवीरः॥वरेणमद्दत्तमतिर्बलाढ्योजिगायसर्वानपिहंतलोकान्॥२८॥सकुंभकर्णप्रमुखैःसमेतः
सहोदरैश्चंडजितादिपुत्रैः॥विजित्ययुध्येविबुधानशेषान्धनानिदिव्यान्यखिलान्यहार्षीत्॥२९॥खगप्रधानादिवकाडयेव
यानिर्लीयतस्मान्निनरांनिलिंपाः॥वसंतिसर्वेवसुधाधराणांगुहास्रगृदंतमसाद्दतास्रः॥३०॥महस्तमुख्यैर्बलवानबलोघैः
प्रहृत्यविघ्नाधिपमस्तशंकं॥उपार्जितांविक्रमणेनलंकांसमुद्रसालांसकिलाधिशेते॥३१॥अभ्यर्दितत्वामनुजानजस्रंपश्चा
नुपघ्नंतिमहीरुहांश्च॥विध्वंसयंतिप्रसभंभवानप्यहोदशग्रीवभटानिशाटाः॥३२॥विच्छिन्नमूलंभुविधर्मवृक्षंविद्विम-

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

भोसंपतिनुमहत्तं॥कृतेभवत्तःकृतमेभवंतिजनास्तदुद्धारविधौसमर्थाः॥२३॥जगद्दुहांसैन्यभरेणभुग्नांवरंधरांधारयितुं
नशक्ताः॥विषंवमंतोविधुरैःशिरोभिर्भजंतिनेत्रेवरुजंभुजंगाः॥२४॥पतिघ्नतानामपिकामलीलाविनोदकोतूहलचारुदृश्या-
स्यः॥निरस्तधर्मःसहस्रन्यनेकाःसमस्तलोकप्रभवाःस्फुरंत्याः॥२५॥विवर्धितेदुष्टजनप्रतापेनिजाश्रमेधर्मनरेंचमग्ने॥इदं
भवत्रायकमप्यजस्रंजगद्भृशंसीदतिदीनबंधो॥२६॥निवेदितंयंजगतामचरुत्वयंचयाताःशरणंभवंतं॥विचार्यतामुत्तर
मत्रकार्यंभवानद्विलोकचितयस्यनाथः॥२७॥एवंविरिंचेननिवेदितार्थःसविश्वदर्शीभगवानवोचत्॥जानेयथोक्तंसकलं
विधातृनालंमहत्तोस्मिजगद्धिताय॥२८॥अहंरुगःपंक्तिरथस्यराजःपुत्रत्वमादायमनुष्यलोके॥हत्वाजगद्द्रोहिजनान
शेषानुधर्मस्थितिंसाधुतरंकरिष्ये॥२९॥साहाय्यकृत्यायनदाभवंतोभवंतुमेयोनिषुवानरेषु॥एवंसमादिश्यसमाधव
स्तानुगंतुनिजंमंदिरमन्वजानीत्॥४०॥ततःप्रहृष्टाःप्रणताश्चतस्मात्गत्वामहींप्राप्यमहानुभावाः॥सर्वेप्यजायंतनिजां
शभागैर्बलीमुख्यानांवनितासुदेवाः॥४१॥अथावनीपालकुलावतंसःसरयास्फरंड्स्यनिभृदितारिः॥महारथःपंक्ति
रथोमहीशःप्रशासितानोत्तरकोसलानां॥४२॥निस्वज्ञनृज्ञःपरिणीयराज्ञोकौसल्यकेकेयकमागधानां॥अविश्रमंवि
श्वमनोहराभिस्ताभिःसमंसाधितधर्मकामः॥४३॥अनेकसत्कर्मविधायकोपिस्फुरानानालोकस्फुरानभिज्ञः॥सचक्रुष्य
शृंगप्रमुखैःसमेतःसंतानयागंमुनिभिश्चकार॥४४॥तेतापसास्तस्यमहीपतेस्तंमहेंद्रतुल्यस्यमहानुभावाः॥यथाविधि
व्याहृतसारमंत्रानिर्वर्तयामासुरनन्यचित्ताः॥४५॥होमावसानेकृतवाह्यकुंडात्समुत्थितःकश्चनदिव्यमूर्त्तिः॥वहन्
कराभ्यांपरमान्नपूर्णंहिरण्मयंभाजनमुद्यतेजाः॥४६॥संतानलाभायमहीपतेत्वमेतद्धृभ्योविभजेतिराजन्॥दत्वान्नपा
त्रंपुरतोमुनीनामंतर्हितोभूत्पुरुषःसमग्रः॥४७॥विभज्यराजाऽन्नमिदंचतुर्धाभागानयत्नीनपिचल्लभाभ्यः॥ददौतिसृभ्यः २
पुनरन्नशिष्टंभागंचमोदान्मगधात्मजायै॥४८॥तारराजभार्याःपरमान्नभागानास्वादयामासुरिमानमहृष्टाः॥तदाविभक्तः

स्वयमंतरासांतेरन्नभागैःप्रविवेशविष्णुः॥४९॥ततःक्रियद्भिर्दिवसैश्चराज्ञ्यःलोकयद्गर्भवतीःस्वभार्याः॥अंतस्तिनस्या
खिललोकभर्त्तुस्तेजोमहिम्नास्फुतरंज्वलंतीः॥५०॥तांवेष्णवेधामनिवर्धमानेकमेणतत्रातितरांविरेजुः॥पूर्वाचलोस्वधनि
गूढमूर्त्तावुदेष्यमाणेत्रशिरीषकांताः॥५१॥स्फुवर्णपद्मप्रतिमप्रकाशंस्वभावतस्तेननृपेणतावत्॥अलक्षिगासांवदनंचधृतां
मध्यंदिवःप्राप्तमिवेंदुबिंबं॥५२॥विवर्धमानंमसमीक्ष्यमध्यंतासांपुरास्वाक्रमणेननम्रं॥शेषादिवस्त्राभिभवंविशंक्यस्तनद्व
यंनालमुरुवंबभूव॥५३॥यथायथातीववभूवतासांशरीरसादोनुदिनंवधूनां॥तथातथात्यरिरंभणादोमनःपरंप्रतिमवाप
राज्ञः॥५४॥ततःसमादिष्टविधानमार्गःपुरोहितेनात्मभुवःस्फुतेन॥चकारकर्माणियथाक्रमंसक्षमापतिःपुंसवनादिका
नि॥५५॥विवासितालंकरणानितासामंगानिपश्यन्नतिमोहनानि॥अविंदतानंदममंदमंतःसनिर्गुणब्रह्ममनिरीक्षयेव॥५६
अलब्धमिष्टंयदिगर्भिणीनांस्फुतस्यवैकल्यमितिप्रसिद्धिः॥चराचरात्मन्युदरंप्रविष्टेहरौपुनःकुचरुचिस्फुतासां॥५७॥
अजस्यमानुष्यविडंबनाचैवभवत्वभूषांहृदयेभिलाषः॥अलब्धनातस्यकथंसहायैबलद्विषोजायतिर्जीवनार्थं॥५८॥
क्रमेणभूयःपरिपूर्णभावंगतेतुगर्भेस्थितांगयष्टीः॥अपश्यदासन्नस्फुतिकालाःशरन्मुखेसारसनीरिवेषः॥५९॥
अथोच्चसंस्थेषुशुभेमुहूर्तेकुजार्कशुक्रांगिरसासितेषु॥पुनर्वसुभ्यांसहितेचचंद्रेप्राप्तेनसाकौसलराजकन्या॥६०
ततःपरस्मिन्नहनिप्रसूताबभूवकैकेय्यपिचारुगात्री॥अनंतरंसामगवेदपूर्वीयंसोकुमारंस्फुवंस्फमित्रा॥६१॥तेषां
हरेरंशसमुद्भवानांकुमारकाणामवनारकाले॥यथास्वधर्मेस्थितभूतजालंजगत्समस्तंसमभूत्प्रहृष्टं॥६२॥गुणांबुराशे
रुदितंपुराज्ञःस्फुताभिधानेषुस्फधाकरेषु॥अमंगलध्वांतमभून्निर्लीनंनिशाचरस्माधरगह्वरेषु॥६३॥निवेद्यतंयंनकु
मारजन्मक्षितीश्वराणांसहितदानपात्रं॥अयंतुराजास्फुतजन्महर्षादवृजयदृष्टिगतानशेषान्॥६४॥भविष्यनाशंचकुल
स्यदेवावधेनमर्त्यानिजरंजनेन॥भूभारभंगेनभुजंगमाश्चप्रकर्षहर्षोत्सवमन्वभूवन्॥६५॥ततोवसिष्ठेनपुरोहितेनप्र

चोदितः पार्थिवचंशकेतुः॥कुमारकाणामकरोदमीषांसज्ञानकर्मस्ननयानतः त्राक्॥६६॥तैरात्मशय्याशयनैर्जनन्योधि
रेजुरुद्यत्सवितृप्रकाशैः॥मनोभिरामैर्मणिभिर्ज्वलद्भिःस्फुरत्फणैरत्र इवस्फकीर्णाः॥६७॥गुणैर्जनानांरमणाद्विपूर्णांतथा
विरामादपिविक्रमेण॥चक्रेसरूढार्थयुगानुसारादयंरामपदाभिधेयं॥६८॥अनंतरंकेकयकन्यकायाः सुतंसच
क्रेभरताभिधानं॥यमाधिमाधव्यथलक्ष्मणाख्यंशत्रुघ्नामानमथिक्षितीशः॥६९॥तैरात्मजैरात्ममनोरथानांसमानरूपैः
सुकृतेनलब्धैः॥रराजराजाहृदयानुमोदैश्चतुर्भिरर्थैरिवमूर्तिमद्भिः॥७०॥दिनेदिनेबालचतुष्टयीसाजगामवोधंजग
दीश्वरस्य॥प्रशस्तपात्रप्रतिपाद्यमानाययाप्रदानुःपुरुषस्यलक्ष्मीः॥७१॥सरामचंद्रःसजलाभ्रनीलःसलक्ष्मणस्तद्वि
सकंविकाभः॥तटित्सवर्णाधिनरेन्द्रतेजःसाचभोपुरीवर्षनभःस्थलीव॥७२॥कुमारकाणांवदनारविंदंमनोभिरामंमनु
जाधिराजः॥निमेषहीनंनयनद्वयेननिपीयनित्यंनजगामतृप्तिं॥७३॥ननादृशःदर्णशशांकबिंबेननादृशःशारदपंक
जेच॥तदाननालोकविधौजनानांबभूवयादृङ्मनसिप्रमोदः॥७४॥दिनेशवंश्योदितमासकार्याःक्रियाःसमस्ता-
अपिबालकानां॥ययाक्रमंतर्पितविश्वलोकश्चकारचक्रायुधविक्रमःसः॥७५॥उत्संगमारोप्यसलालयंस्तान्
वत्सान्मृदुस्मेरमुखाननस्रं॥अपुत्रभावोदितदुःखतप्तंचिरादुपात्ल्हादयदात्मदेहं॥७६॥कुमारकाजानुकरद्वयेन-
क्षितौंचरंतःकतिचिद्दिनानि॥अहार्षुरंतःकरणंजनानांमनोहराणांसकलंमनोज्ञं॥७७॥आलंब्यधात्रीकरपल्लवं
नेपादंन्यसंतोभुविमंदमंदं॥विनावलंबंस्वयमेवभूयःक्रमेणसंचारपटुत्वमापुः॥७८॥विनानिदानंविदधुर्मुखाज्ञा
न्विचेयदंतांकुरकांतिकांतान्॥विलोकयन्विश्लथकुंतलांस्तानविभुर्वरिष्ठः ह्लुतिनांबभूव॥७९॥अमात्यपुत्रैःस
हतेवयस्यैःसंक्रीडमानाःसततंकुमाराः॥प्रवर्धयंतःप्रमदंजनानांक्रमेणकौमारदशांव्यतीयुः॥८०॥अथस्वपुत्रानधृ
तकाकपक्षानविधायधृत्यांश्रमवर्त्तिनस्तान्॥न्ययुंक्तविद्याभ्यसनेविनीतान्नृपःपुरोधश्चरणंप्रणीतान्॥८१॥अष्टादश

स्वयंचनीशपुत्राविद्यास्फुरेदमुखास्फुरेन॥प्रशिक्षितास्तेगुरुणाचरेणविशिष्यशास्त्रेषुविनीतवेषाः॥८२॥पुरोरुदारा
दधिगम्यविद्याःसांगाःसमस्ताअपिबालकास्ते॥तदाबभूवुर्वयसैववालानविद्ययाविस्फुतसद्गुणौघाः॥८३॥शौर्यादि-
भिर्गुणगणैर्नृपतेःकुमारास्तैरंजिताखिलजगज्जननाबभूवुः॥तेषामपिप्रथमतांप्रथमस्फुरेजेपर्यायहृत्तिरखिलेष्वपि
शोभतेहि॥८४॥आल्हादनामनितरामकरोज्जनानांराकानिशाकरइवप्रियदर्शनोसौ॥तैरेवरामममुनापिजगत्त्रयेषुश्रीरा
मचंद्रइतिसर्वजनावदंति॥८५॥गांभीर्यधैर्यमतिनीतिपराक्रमौजःकीर्त्तिक्षमात्रगमरक्षणशिक्षणैःसः॥जिग्येसमुद्रहि
मवत्फ्रजंगशर्जावसुत्रामभित्रविधुभूमिद्दराजधर्मान्॥८६॥लोकोत्तरैर्गुणगणैर्गणनास्त्रगम्यैस्तारागणैरिवशशी
सहितस्फुरामः॥ज्योत्स्नानिभेनयशसानिकरेणचक्रेचित्रंजनौघमुपमाननिराशमेव॥८७॥गुणस्मृतैरेवंसततमनु
रूपैरवरजैर्गुरोरंतर्मोदंगुरुनरमथावर्धयदयं॥सराजाप्येतेषांविरहमसहिष्णुःक्षणमपिमन्दृष्टःसाकेतस्फुरवमवसद्मा
त्मीयनगरे॥८८॥इतिकोविदचक्रचूडामणिनायुवराजेनविरचितेश्रीरामचरितेमहाकाव्येप्रथमःसर्गः॥ ७॥ २॥
श्रीगणेशायनमः॥अथजातुजनाधिपेप्रेषदेकुशिकानांकुलनंदनोमहर्षिः॥निजकर्मविघातकर्तृकाणांनिधनार्थंनि
शिचारकेटकानां॥१॥तमुपागतमासनेमनोज्ञेमुनिवर्यंविनिवेश्यभक्तिशाली॥विहितापचितिर्वसंधरेशःस्मितपूर्वं
समुवाचवाचमेवं॥२॥भवतांस्मुपागमादिदानींपरिपूतानगरीयमस्मदीया॥महतांपदपद्मजंपरागंपवनानांपवनंस्प
र्शादिशंति॥३॥समयत्रयजैःकुलस्यभानोर्बहुभिःपुण्यचयैरनत्रागमोयं॥कथमन्यदृषैरवापनीयामहतांसंगतिरीदृ-
शात्मनेव॥४॥अपिकाननवासिनांजनानांकुशलंकौशिकवंशरत्नदीप॥अपिचित्तमनाविलंसमाधिष्वविनिर्विघ्नसमा
धिनाःक्रियाश्च॥५॥भवदागममात्रतःप्रसादंहृदयंमेभृशमश्नुतेतथापि॥अवणेंद्रियतर्पणेकृताशंगुणलुब्धोनकिमु
त्तरोत्तरार्थं॥६॥स्फुरतंरवस्तुमेप्रधानहेतुर्भवदीयागमनेमुनेतथापि॥अपरंजनबोधनार्थमस्मिन्नियतंकश्चनहेतु

रस्तिवाद्यः॥ ७॥ममिताक्षरमेवमुच्चरंनमहसन्नाहमुनिर्जनाधिनाथं॥दशनामृतदीधितिलवीनांपरमेरःपरमुक्तिमाननोबुन
न्मा॥ ८॥त्वयिगोप्तरिराजराजकल्पेजगतिक्षापिभवत्यमंगलंन॥तपनेतपतिस्फुरन्मयूखैर्तिमिराणामुदयस्यकाकथास्या
त्॥ ९॥भवदीययशःपयःपयोधेर्जगदानंदउदेयिवानुदारः॥अतएवविधोजनानिशानंहिकार्यंसतिकारणेषुकामः॥१०
गुणवारिधिमध्यवर्त्तिनस्तेजगतांभवनेषाभिरावितासन्॥तनयाजनपालनैकदक्षाःपुरुषस्यैवपरस्यबाहुदंडाः॥११॥अ
धुनैवभवेनमामलभ्यंपरिपूर्णंनृपतेजनावदंति॥यदमीजनिनाःकुमारकास्तेपुरुषार्थाइवचारुमूर्त्तिमंतः॥१२॥अवैल
कयितुंभवंतमेवंगुणवंतंचिरमंतरुज्झितंमे॥स्फुटहानभिलाषरूषराजन्फलितोभूदधुनैवदैवयोगात्॥१३॥भवदीक्षणजा
तकौतुकस्यक्षितिनाथागमनंममाधुनातु॥उदभूदिहकारणंकनीयःक्षणदाचारिजनप्रयुक्तडिंबः॥१४॥यज्ञनाशयदा
यदामहत्तावयमुत्याद्यविधानसाधनानि॥द्रुतमेत्यनदानदानिशाराअपिविघ्नायकृशानुदूषणार्घैः॥१५॥क्रतुविघ्नक
रस्तपोव्ययेनक्षपणायास्तदपित्वदाश्रयाःस्मः॥तपसेवसदावयंधनाढ्याद्यदसाधुक्षपणेनचापियूयं॥१६॥स्वलयं
शमहादवीक्षशानुस्तनयोयंनवदेवरामचंद्रः॥जगतामवनायजागरूकोजयतीहावरजैःसहानुरूपैः॥१७॥अमुमेवनि
युंक्ष्वदुष्टशिक्षाविधयेविक्षनसद्गुणांबुराशिं॥कथितेषुजनेरमुष्यराजन्नपदानेषुविशिष्यकौतुकंनः॥१८॥शिशुरे
षकथंनिशाचरणांनिधनायेतिविभोनशंकनीयं॥शिशुरप्युदयन्मदान्मदेभानविनिहंतुंनहरिःकदाप्यशक्तः॥१९॥अ
तिदुष्टदशाननादिरक्षःकुलमुन्मूलयितुंनितांतमिच्छोः॥अधुनामधुनाशनस्यमात्राःपरिपश्यामिरुनेपुनेर्न्नाः॥२०
तनुभूरिरहःसंगगर्भोनृपतिस्तस्यनिशम्यवाचमेवं॥अतिवेल्लमवापनापमंतःसविषादःसविषंयथान्नमश्नन्॥२१॥
हृदिधैर्यनिधेरमुष्यपूर्णाप्यभितापोनबहिःप्रकाशतंस्म॥चडवानलतापितांतरोपिस्पृशतांशीतलएवसिंधुराजः॥२२
असतांदमनंकनोश्वरक्षामणयःसार्थकएषनापसेंद्रः॥अभियाचकलोकचित्तवृत्तेःपरिपूर्त्तिश्चरवेःकुलस्यधर्मः॥२३

इतिभूमिपतिःस्फुटप्रवासेक्षनसंतापमपिप्रसक्तएव॥नमनःमनिकूलनामनेषीद्वचनंचेदमुवाचगाधिपुत्रं॥२४॥दृशुकःप
रिशीलितोनयुद्धेषुकृतास्त्रःपरकैर्नवानभिज्ञः॥नदपित्वदनुग्रहेणमन्येनभवेत्काप्यपमंगलंकिलास्य॥२५॥मुनिनाथभवा
नरवलुममाणेपरिपाल्यःसततंत्वयैवबालः॥इतियाचमुदीर्यभूपतिस्तंमुनिद्वंद्वेश्यसमर्पयांबभूव॥२६॥मगधाधिपनं
दिनीक्षनोयःक्षणमप्ययज्ञमंतरेणनास्ते॥तमपिप्रददौतपोधनायक्षितिनाथःस्फुटमेषलक्ष्मणाख्यं॥२७॥परिगृह्यससराम
लक्ष्मणौतावनुरूपौसहजौसचापबाणौ॥अधिकाधिगमादयैकयार्चासुदमन्यंनमवापनापसेंद्रः॥२८॥नृपतिंनमिताग्रिरा
जचक्रंननमूर्धानमथात्मपादपद्मे॥अनुगृह्यनमाशिषानिसाध्व्यामयथोगाधिरकृतोनिजाश्रमाय॥२९॥अनुजग्मतुरुद
गद्विनीतौसहजौराघवलक्ष्मणौमुनींद्रं॥नृपतेर्नयनेचपुत्रकौनाववियोगविनिमेषपक्ष्मजाले॥३०॥अथगाधिनमन्वि
तौकुमारौसितसोम्याविवसूर्यमुज्ज्वलंतं॥पुरवासिजनानुदश्रुनेत्रानविदधानौपुरतोनिरीयतुस्तौ॥३१॥विषयाननिलं
घ्यपत्तनान्यथवर्नानाथरुतौमुनीश्वरश्च॥मयपुर्द्रुतमुज्ज्वलस्वरूपाअपधूमाइवपावकास्त्वयस्ते॥३२॥अथवर्त्मनिनाप
सेनताभ्यामुपदिष्टोभयंतनसारमंत्रौ॥क्षुधयातृषयाचनाभिभूतौपृथुकावप्यनयोःप्रभावनस्तौ॥३३॥अतिलंघितनेन
कनीहृतस्तैगहनंकाननमाविशन्प्रभीताः॥जनपादनपादवप्रसिद्धावसतिंयत्रचकारताटकासा॥३४॥उपलभ्यमनुष्य
गंधमेषापदर्वांसत्वरमन्विष्यपतेषां॥परपीडनजागरूकबुद्धेर्निशिचर्याश्चमुनिर्निघातयिष्यन्॥३५॥अथघोरतरादृहा
सकोलाद्भलविद्राशितविश्वसत्वसंघा॥गतिवेगपतत्समीपवृक्षांतरसासाभिपपातनाटकानान्॥३६॥घनमार्गविलंघना
यकायांज्वलदंगारनिभोग्रदृष्टिं॥मबलोछ्वसितधूम्रकेशपाशांशितदंष्ट्राविलसन्नृमांसरंडां॥३७॥अथनामबलोक्य
घोररूपामभियांतामभियोद्यतैकबाहुं॥भयकंपितधीर्वधायतस्यास्त्वरयामासरघूत्तमंमहर्षिः॥३८॥पुरुषादयंविनि
घ्नतीनांनवधःस्याद्घृणिनायदुर्वधूनां॥इतितापसवाक्यतःसतस्याविजहारावसुधेवधूत्वशंकां॥३९॥अधिगंपितसार

सिंजिनीके सनुसंधायतनः शरंशरासे॥ उरसिभृजिघायतानकायाघनपाषाणकठोरघोररूपे॥४०॥शरघातनिपातिनानतः साविगनासकः पृथिवीतलेपपात॥मघवायुधपातखृनपक्षः शिखरीवोन्मथितांनिकादवीका॥४१॥रजनीचरमानिनीमथैनांविनिहन्यारिबलौकघातशीलां॥पथिकैःस्कगमंविधायदावंमयशुर्गाधिसुतादयञ्चयस्ने॥४२॥धनुषिप्रसमीक्ष्यविस्मितात्मानिपुणत्वंदृढयुक्स्यराघवस्य॥मुनिरस्यनिजांतरंगयुमानथदिव्यास्त्रगणानुपादिशत्सः॥४३॥मुनिनानुसमंत्रपूर्वदत्तान्यथशस्त्राणिधृतादरेणतानि॥ननुमंतिरघूत्तमस्यपार्श्वेसमसेवंतनदाक्षणंसमेत्य॥४४॥अधिगम्यमुनेरथास्त्रजालंविधिदेवमसुरवंविशांवरिष्ठः॥विबलासभृशंमसन्नभावंशरदभ्रंयथानिशाथिनीशः॥४५॥अतिलंघ्यसरिद्वनप्रदेशानथतत्तच्चरितानिवर्णयंश्च॥मुनिराप्तनिजाश्रमंसदाभ्यांविहितसत्कदयःस्वशिष्यवर्गैः॥४६॥समुपेत्यमुनिःसपर्णशालांनिजशिष्यार्जितयज्ञसाधनाढ्यां॥नृपतेस्तनयौयथानगर्यांस्मरयामासभृशंप्रसन्नभावः॥४७॥मुनयःपरिधायराजपुत्रौयजनायागमिनौमनोहरांगौ॥अपपुर्नयनैःकुतूहलोत्कैरविचंडाविवभूतलंप्रयातौ॥४८॥अभिवंद्यमहर्षिसत्तमांस्तानविधिवद्राजसुतौविनीतभावौ॥विरराजतुरन्युदारवीर्यौभवणत्वंद्विमहन्स्फशोभनाय॥४९॥अथतांरजनींस्मरंवेनतीत्वाकृतसंध्यानियमःसतापसेंद्रः॥अवदन्नृपतेःकुमारकौतौयजनारंभविधिंविधातुकामः॥५०॥निचितानिसमस्तसाधनानिद्रुतमारभ्यतएवसंभृतंवः॥भवदीयभुजाबलावलंबावयमद्यैवभवामसिद्धदीक्षाः॥५१॥धृतचापशरासनौभवंतावुदजह्वारिसदेवसज्ञिनौस्वं॥रजनीचरपालिरागमिष्यत्यविलंबंमतियाल्यतांकुमारौ॥५२॥इतिसक्रतुरक्षणार्थमेतौसमुपादिश्यमुनिर्महीशपुत्रौ॥परिशुद्धमतिर्जगामदीक्षांमहिनर्त्विग्जनवर्त्तिनक्रियावान्॥५३॥ज्वलतिज्वलनेमहर्षिमुख्यैर्विधिवद्धोमविधौविधीयमाने॥अथनक्तनधूमसंचयाद्राक्दिविनक्तंचरपालिराविरासीत॥५४॥विततानिवियतिक्षपाचराब्दाःशितदंष्ट्रासचिचंचलांचितांगाः॥रुधि

रोच्चयवर्षमस्त्रिमालाकरकाढ्यांविदधुःकरालघोषाः॥५५॥वियतिभ्रमदर्भास्यकालमेघप्रतिमंपुण्यजनोघमुन्नदंतं॥अपलोहितपूरवर्षमुच्चैर्मुनयस्तवचितचस्फुर्तिमांतं॥५६॥तदनुक्षितिपात्मजोपिरक्षःकुलमुद्दीक्ष्यरणेक्षुरान्तचापः॥मथमंत्रदिकंपमाप्तुतेषांगुणघोषैर्निदधौनतःशरांश्च॥५७॥दृढमुच्चापधरेनबांबुदाभःशरजालैःप्रतिवर्षमादधानः॥रघुसूनुरुदारवीर्यशमयामासनिशाचराब्दमुक्तं॥५८॥पिशितानिशितैर्मुनेर्मुयूथंपेयोधृतमारीचसुबाहुनामधेयो॥नयमंजलधिंनिनायबाणैरपरंनचयमस्यधामगामः॥५९॥हतयूथपतिर्निशाचरालीपरिदुद्रावनदाभुगैर्निरस्ता॥दशसुप्तशतांतादिशासुभिन्नाद्रुतवातूलविधूतकालिकेव॥६०॥क्षपितेतदनुक्षपाचरौघेनृपपुत्रेणनितांतशक्तिभाजा॥अपविघ्नममुष्यकर्मशेषंविधिवत्तेनिरवर्त्तयन्मुनींद्राः॥६१॥तस्यार्थसाधुविहितावभृथाप्लवस्यसाज्ञासिताशिरनुज्ञेनसमंसरामः॥कर्मावसानसमयेकुशिकस्यसूनोर्जयाहपादकमलंजगदेकवीरः॥६२॥पादह्वयेनिपतितंनृपतेःकुमारमुत्थाप्यसानुजमसौस्मरनरांसलग्नः॥कर्मानुरूपमचिरेणफलंलभस्वेत्यन्वग्रहीछिरसिदत्तकरारविंदः॥६३॥मामःपुनर्मुनिवरःकृतकृत्यभावंताभ्यांसमंसरसमानपराक्रमाभ्यां॥आत्माश्रमेविषयमार्गनिवर्त्तितात्मास्थैरंनिवासमकरोत्कतिचिद्दिनानि॥६४॥तस्यावदानसदृशंप्रतिकर्तुकामस्तेजोनिधेस्तदनुकौशिकवंशदीपः॥आलोच्यतंपरिणयोचितमेवकालंकन्यांजगाममनसाजनकस्यराज्ञः॥६५॥गंतुंमुनिर्मिथिलराजपुरंमियेषयावत्तदीयननयाममुनाबुबुद्धे॥आमंत्रितस्तदनुतेनमखायतावत्सद्यःसतामनुगुणाविधिरिष्टसिद्धेः॥६६॥संमन्त्रितःसपदिराजकुमाराकाभ्यांसंकंदनप्रतिमबाहुपराक्रमाभ्यां॥साईं विदेहविषयानददेयेंद्रियाभ्यांदर्दायथामुनिवरःस्मरकंदराभ्यां॥६७॥तेगौतमाश्रमचरंवनमेत्यमार्गेस्निग्धछदद्रुमतलेषुनिशिन्यवात्सुः॥यत्तापसेंद्रतपसश्चनदीयजायादोषस्यधामचरणाधिरथाब्धिः॥६८॥शापेनभर्तुरमराधिपराजसंगाज्ज्ञानक्षुधःपृथुशिलामयमूर्तिमुच्चैः॥तत्रस्थितांकृचनगोतमध

र्मपत्नीतरस्मैन्यवेदयदयंरघुपुंगवाय॥६९॥तस्याघिपंकजरजःकणसाध्यमस्याःशापस्यमोक्षमपिनापसतोनिशम्य॥राम
श्चकारचरणांशनकैःशिलायांसद्यःस्वकंवपुरवापचनापसारा॥७०॥निर्मुक्तनिष्ठुरपरियहपाशबंधःप्रापप्रियंमुनिवर
स्यपरियहोसौ॥तेपिमसन्नतदनुग्रहपात्रभूताजग्मुर्जवेनजनकाधिपराजधानीं॥७१॥आगंयुकंमुनिवरंजनकोयथावद
र्घ्यादिभिःसपदिपूजयतिस्मविद्वान्॥इक्ष्वाकुवंशसकृतावपिवाल्कोनोदृष्टोमुनिर्नृपतयेकथयांचभूव॥७२॥अभ्या
गतेनमुनिनानृपतिर्नितांतंदध्रेमुदंमुनिरपिक्षितिपेनतेन॥लोकत्रयोत्तरचरित्रचनांजनानामन्योन्यनोपणकरणिसमा
गतानि॥७३॥सभ्येःपरस्परमथांगिरसादिभिस्तैःसंकीर्तितोज्वलचिचित्रपुराणवृत्तः॥यज्ञेसमापनमिनेजनकायरामं
व्यज्ञापयत्सविशिरवासनदर्शनोत्कं॥७४॥क्वासौशिशुःक्वकिलतडनुरेंदुचूडंयेनक्षितीशतनयाबहवोनिरस्ताः॥चन्द्र
स्यभेदनविधोकुरुकायधाराभूयात्कथंनुकविनांतरभेदनस्य॥७५॥इत्थंविचिंत्यनृपतिंविमनायमानंदृष्ट्वामुनिःसक
लतत्वविदांवरिष्ठः॥तत्तादृगेतदवदानकथाभिरेनंसद्यःसतांप्रवरमुन्मनसंचकार॥७६॥तस्याज्ञयानदनुकिंकरसंघनी
तंजयाहपाणिकमलेनधनुःकुमारः॥लीलावशेनचमुकुर्मुकुरुल्लसन्त्यांसज्जंचकारनृपतिंपरितोषयन्नसः॥७७॥ते
नानिमात्रपरिदृष्टमनूनसारंवैय्यत्रकंधनुरहोनरसाविभग्नं॥कोलाहलस्तदनुनत्परिभंगजन्मालोकत्रयांतरमपूर
यदत्यदारः॥७८॥तदृष्टस्तदाभृशमसौमिथिलाधिनाथश्चक्रेमनेनिजसुताप्तिपादनाय॥आनेतुमप्यधिपमुत्तर
कोसलानांसमाहिणोदथपुरोहितमेवधन्यः॥७९॥गत्वाजवेनसमुपेत्यककुत्स्थवंश्यंविज्ञाप्यवाचिकमसौचकुमानद्व
यं॥निन्येविदेहविषयान्सहदारपुत्रंनंसैन्यभारपरिकंपितभूमिचक्रं॥८०॥अभ्येयिवांसमथसूर्यकुलप्रदीपमभ्य
र्चिनंदशरथंजनकोयथावत्॥पुत्रीचतुष्टयमिदंतनयैश्चतुर्भिर्दत्तंहृदापरिगृह्णातुमयाचतेषः॥८१॥कन्यामयोनिजनु
षंरघुपुंगवायस्वामोरसीमथसुतामपिलक्ष्मणाय॥द्वाभ्यांकुशध्वजसुतेभरतायतस्मैसौमित्रयेचसमकल्पयनप्रजे

शः॥८२॥चक्रुस्ततःपरिणयंविधिनाकुमारास्तासांक्रमान्निजपुरोहितचोदितेन॥रात्रींदुसंगमइवानिनरामभीषाम
न्योन्यशोभनकरःसबभूवयोगः॥८३॥पुत्रैःसमंदशरथःसुतदारयोगैर्नीत्वासकानिचिदहानिसुहृन्निकेते॥संन
स्थितःसहपुरोहितमात्मगेहंसारध्वजेनबकुकत्थितपारिबर्हैः॥८४॥अथनृपमनुयांतंमैथिलंमार्गमध्येदशरथनर
पालःसन्निवर्त्यप्रयातः॥तपनतपनसहस्रद्योतवद्दुर्निरीक्षंसरबलुकिमपितेजःस्वांशभागेददर्श॥८५॥कोधाग्नेर्निजना
मनियद्वकथाधाय्यासमुद्दीपितेजुह्वतंतजुहावयःपरशुनाराजन्यवंशाहुतिं॥उन्मीलत्गुरुचापभंजनरवमोत्थापित=
स्तत्क्षणंमध्येमार्गमसावदृश्यतमुनिस्तेजोनिधिर्भार्गवः॥८६॥एकेनाखिलराजलोकदहनंतेजःकुवाराभियंबिभ्र
तपाणितलेननिर्भरतरज्वालावलीभास्करं॥अन्येनाखिलपापकर्षणचणंरुद्राक्षमालामपिबत्मक्षत्रियधार्मिको
मुनिवरःप्राप्तोनृपस्यांतिकं॥८७॥बत्मन्नर्घ्यपाद्यमित्याद्युदीर्यमत्कृतंभूमिनाथंविहाय॥रामोयत्रव्यक्षकोदंडहंता
गत्वातत्रकोधनोसौबभाषे॥८८॥रेरेबालककालकालधनुषोभंगस्त्वयाभावितोनन्वारोपयचेछवंधनुरिदंदृक्ष्यामिते
विक्रमं॥नोचेत्तायुरुचापभंगकरणव्यक्तापराधंजवात्कुर्वेसर्वमहीशवंशदहनक्रूरंकुठारंतथिं॥८९॥उक्तेवंधनुरा
पर्यतभृगुपतीरामोगृह्णात्वाडुतंमज्जीकृत्यसलीलमेवविशिरवंसंधायकर्षनगुणं॥बत्मन्कुत्रसृजामिसायकमिमंने
वमहार्योभवान्विमत्तेनपुरोगतोपिनशरोमोघोममेत्यब्रवीत्॥९०॥तदनुमुनिवरेणत्रस्तुनातत्ररामस्वगतिहतिसमर्थं
चेछवंवीक्ष्यवीर्यं॥सकरुणपदमेयप्रार्थ्यमानोदयालुःशरमथतपसांत्तलोकमाहंतुमोऽझन॥९१॥दृष्ट्वाडुतंनंदपिक
र्मकुमारकस्यतुष्टोमुनिःसपदिनष्टमदातिरेकः॥आशीर्भिरेनमनुगृह्यहृतभणामंसार्धायर्सीभिरथसाधयनिस्म
शांतः॥९२॥यातेनत्रमुनीश्वरेदशरथोगाढंसमाश्लिष्यतंपुत्रंजेत्रमसंस्तनिर्गतमिवक्रूरस्यमृत्योर्मुखात्॥तुष्टःकष्ट
दशाव्यतिक्रमणतःप्रापस्वकंमंदिरंसत्रापुत्रकलत्रमित्रनिवहैःसत्रामबंधुर्नृपः॥९३॥चरणगतजनत्राश्चारुनाधूर्ण

गात्रावितिदिनसकलशस्त्रास्त्रचारभावातिमात्राः॥चिरतरमथपिचाचिंत्यमानाश्चमात्रारमितनिजकलत्रोरुजिरंराजपुत्राः॥
९४॥इतिकोविदचक्रचूडामणिनायुधराजेनविरचितेश्रीरामचरित्रेमहाकाव्येहिनीयःसर्गः॥ ७॥ ७॥ ७॥
श्रीगणेशायनमः॥अथाधिगम्यक्षितिपालनंदनामयोनिजामंगजशास्त्रकोविदः॥अरीरमन्नामरविंदलोचनांचिरायरामश्च
रणाननप्रियः॥१॥अशेषकर्मानिजशिल्पनैपुणीपरीक्षणार्थंकमलाशिवादयः॥पुराव्यरच्यंतहिदिव्ययोषितोव्यधायिभू
यःकुशलेनयाध्रुवं॥२॥मनुष्यनारीजननोपियोघतंदिवोकसांश्रेष्ठतमंवदंतियत्॥तदद्यधात्राविपरीतमाहितंबतेतिशो
चंतिस्मराश्चयत्कृतौ॥३॥विधुंयदास्यंचविधायवेधसान्यधायिषातामनयोर्विपामृते॥तदेवरूपंहृदिदृश्यतेतयोः
कलंकदंतच्छदकैतवेनहि॥४॥जगज्जिगीषोर्मदनस्यसाधनैर्यदंगमाधायिविरिंचिनाध्रुवं॥चकास्तियद्लोचनयोःपृ
थक्कृतास्त्रयोर्धनुष्टंकुचयोरथांगता॥५॥यदीययोःकांचनपद्मकोशयोरुरोजनाम्नोरविकासनोचिता॥सर्मापयत्नेन
सतनंमुरद्वाक्षयःक्षुधानिधिःस्कंदरहःसचंडिकः॥६॥विलासवापीरवलुविभ्रमोहिनीयदीयनाभिःस्मरमामृतानतोः
॥कुचद्वयंरोमलतायचर्न्नितन्सरोजकोशद्वयमेकनालजं॥७॥श्रियंदधानंकरभानिशायिनींयदीयमूरुद्वयमात्तमा
र्दवं॥करंकरींद्रस्यकरेतिकर्कशंकुतःमकारादुपमानमात्मनः॥८॥जिगायरंभामरुदंगसंगमेसवेपथुंस्वारुगुणेनस्म
दरा॥निशम्यवार्त्तामितिजातमत्सरानयच्चरंभारमणीशिरोमणी॥९॥स्फुरत्स्वनैःसाधुस्फुरद्गुणैरसंकरालंकृतयत्पद
मल्पितांबुजं॥अजस्रमेतद्वगतिमश्नुतेपरांपरंतुपंकोत्करणवर्तितं॥१०॥सदापरश्रीकरमेवकांचनंयदंगसंगेपुनथा
त्वमुच्यते॥तदेवगृह्णातिनदानदत्वयन्नकांचनंनांचतिकांचनश्रियं॥११॥यशोयदीयंयमशासनालयक्षमाधरस्यर्ध
नमाचचारयत॥ततःकिमाशीदितिलोकचिंतनंतदीयदुर्वर्णनयैवशाम्यते॥१२॥यदंतरासाद्यपतिंचचोदितारस्वतीवा
दयतीववल्लकीं॥तथाहिसर्वेस्वहृतेषुवत्सलाःस्मरस्मदीयश्वगिरोहपंचमः॥१३॥अवाङ्मुखंवाङ्मुखनिर्जितंययाय

योवनंयौवनमान्यपुष्टकं॥किमाक्षयत्यात्मनिगूहनेमुकुर्भयेननत्रापितमोमयींकुहूं॥१४॥तयासमेतःसपुरंपुरंदरः पु
रंदरद्माधरसुंदरंभुवः॥समाससादस्मरकेलिकौतुकीसमासमानंदविधायिसंपदां॥१५॥प्रियःप्रियायाःमथमोपयोज
नेमयस्तवानप्यभवत्प्रहृष्यधीः॥रसेकसारेरसिकस्यवस्फुनिमयातिचेनःमदंहिदुर्लभं॥१६॥उपेत्यकेलीगृहमुज्वलो
ज्ज्वलंबभाजशय्यातलमच्छकोमलं॥सकालधौतानतदुग्धपूर्णतत्फेनाहमध्यस्थितनूतनाज्यवत्॥१७॥अथैषदंकुरि
तचारुयौवनांगुणात्करस्रोभितविश्वयौवनां॥नरेंद्रसूनुर्निजकेलिमंदिरंसमाजुहावस्वयमंबुजेक्षणां॥१८॥नपारयामा
सचिरायसाह्रियाबहिःस्थितांतस्थितयासुमालयं॥यदापुनःसेवकदापिसाभवत्तदानकूनिर्दयितस्यनिष्फला॥१९॥म
वेष्टितायास्फकथंचिदालयंसर्वाभिरन्यत्रविलोभनादिभिः॥समीक्ष्यकांतंसपदिश्रितह्रियःकपाटपृष्टःशरणंनतभ्रुवः
॥२०॥वरःपरंत्रिस्रिलोचनस्यादृशःकणेनैवकिमप्यचुंबिसः॥निवर्त्तिनाक्षःसचवीक्ष्यसिस्मियेमनीक्षिनंयेनतदेवचे
ष्टितं॥२१॥तदक्षिणीनामरसेयदिस्फुटेनसत्यतांतस्यमुखेंदुदर्शनं॥अनोचितंयंयदसंमुखःशनैरलोकिताभ्यामयमं
तरंतरा॥२२॥चिरायधन्याभनिहारदंडिकाकपाटपृष्ठश्चननस्तदाश्रयात्॥अनेहसाभूतबकूनेवधन्यतातदंगसंगा
च्छयनस्यतस्यवा॥२३॥तायानुभावंगमितापितस्यकेप्रियाभिमुख्येनबभाजसाह्रिया॥नृपस्फनिद्रामभिनीयतद्दशा
दपापरावः स्फुटमालिलिंगतां॥२४॥प्रियस्यतस्याःमथमांगसंगमेस्फुरत्समग्नमिवासमानसं॥अमंदमंदाक्षमयाक्ष
वाग्निनंदुत्यमानंदमियंनचाध्यगात्॥२५॥वपानुभावादपहृयदंतरंविहायकेलीशयनंविनिर्यतां॥स्वबाहुवल्लीवि
लयेनधारितामशीशयन्नामयमात्तसाहसः॥२६॥इतस्तवह्रीर्भयमप्यपास्यतांत्यक्तेत्रीणननत्परःपरं॥इतिप्रियेण
ब्रुवतावलोकितंकरंगुलीमध्यगतंमृदुस्मितं॥२७॥मुकुर्मुकुश्चादृशानिवर्षतःप्रियस्यभूयःमदायसाभवत्॥भयत्र
पामन्मथबालरेवलनाविलासरंगंदधतीकलेवरं॥२८॥यदाविभिद्यह्रियमात्मकुंजनींमनोभुवाकिंचिदुदंचितंशिरः॥

त्हृदिप्रियायाविनिवेशितस्तदाकरःप्रियस्याङ्गतनत्सहायतां॥३९॥ननाननायानिलिनंननभ्रुवःकलंघियोश्चुंबतिनम्रखो
बुजे॥अवज्ञयेवमनिपक्षसंश्रयेकराज्ञमस्यानिरुगेधनन्मुहुः॥३०॥कमेणनत्तनपरिशीलनादिनानृपेणनस्याभयमा
पिदूरतां॥कुमारकेणापिनदाविशंकिनामनोभुवेषज्ञयनावनद्भियः॥३१॥सरोजयोस्त्वष्टृगणावतंसयोःसरंधिनार्का
दृगितिक्षमाभृता॥तदंतिकप्राप्तिनवच्कवारुहामनार्यसाचुंबिकपोलभूतले॥३२॥किमचजातंतवचुंबितेलिकेकपोलयो
र्वाकलवाणिभण्यतां॥इतोनिरिक्तंभविनानतेधरेनचेदितोमद्विरिमास्मविश्वसीः॥३३॥इतीश्वरेणेंगितसारवेदिनाक्षि
तिस्तदर्धानुमनावगामिना॥विचुंब्यतत्पल्लवकोमलाधरंभृशंममज्जेममदाभिधोबुधो॥३४॥मनःसमाधायमनोज्ञशी
लया बलादुपाकामिचिरंविलोकितुं॥उपाचरद्विघ्नममुष्यतत्क्षणान्स्मितप्रदानात्पतिरेवसाक्षमी॥३५॥कुचद्वय
स्योपरिकर्कशात्मनोनिधानुकामेकरपद्ममीश्वरे॥निपीडनंतस्यविशंक्यवल्लभाकिमचद्यस्तोपरितस्तरेनिजो॥३६
असंमुखोहंपरिरभ्यनामितिप्रियेणसाचीकृतमाननंनिजं॥अपारयत्सानतयाविनत्कृतोविलोक्यनद्विंबमुपोन
मित्तिगं॥३७॥करंकृशांग्याःपरिगृह्यपार्थिवःस्ववक्षसायोजयतिस्मकोमले॥द्रुतंद्रवीभूयनदानदास्तिनाःप्रसस्करा
तद्यघुस्तृणस्यैरणवः॥३८॥प्रसत्यनस्याःपिबतारदच्छदंनदंतरागाचरणोद्यतेकरे॥निरंशुकीकृत्यकुचद्वयंजवात्समालि
लिंगेस्फुटंमहीभृता॥३९॥यदत्रकिंचिच्चपयाननास्यत्रानिजेछयारंभितयासमीहितं॥तदर्थमर्थित्वमवापचेद्रियस्त
देवसद्यःसमकोचिस्फुब्रुवा॥४०॥ममाद्यमाभूत्पतिकेलिवामनेत्यहःस्फुतस्यात्हृदियेसमाधयः॥निशास्फुमंदाक्षपिशा
चकुंकुनानिशम्यभीतैरिवतैःपलायितं॥४१॥क्षमाभृतश्चाटुकथाभिषेचनात्क्रमेणनस्यात्हृदिकामपादपः॥अपिच
पाशुपनिदाघपोरुषंमनागनाहत्यपुपोषपोषणं॥४२॥निपीड्यामासनृपस्यचुंबनोनिजाधरेणाधरमंगनाशनेः॥तथाम
नायुन्नमितस्तनीचसाबभूवपत्युःपरिरंभविभ्रमे॥४३॥क्रमेणसाचात्यरनेषुवामनोविहायसंजानरसायदाभवत्॥नृ

DOCUMENTATION CENTRE
Sarat Chandra Das

पोपितावत्स्वतुनाविमोचनेकरंकरेणुप्रचरोव्यचीचरत्॥४४॥सनिड्यामुद्धितचेतसःशनैर्विमुच्यतस्याद्दढनीविबंध
नं॥प्रबोध्यचाहस्तनकंपनैरिमांकयंतवेयंगलितेतिसस्मितं॥४५॥अथह्रियासंकुचितांगवल्लरीपयःस्फुतेलप्रति
वतप्रसृतया॥ससंभ्रमोहेगनिबद्धनीविकाप्रियप्रमोदार्णवसेतुमछिनत्॥४६॥कुचद्वयांतेनिहितोपितत्करस्तत्यान
धृतःपरमचगादितः॥विशंक्यनीवीरवमोचनंननःस्फुमर्द आसीत्तदमुष्यतत्कुचः॥४७॥निधायतस्याःपुरतःसदर्पणंवि
लोकयंस्तवमतिबिंबमुल्बणं॥विमुच्यतेनाविरसाविनिर्वृतंहसन्मुखस्तज्जघनेऽकरोत्करं॥४८॥तदूरुकांडेसविलो
समर्पितःशयःशयानेनसहानयामुना॥स्फुटंतदीयेनजवादुदंचनाविधूननांवेपथुनेवयापितः॥४९॥सरोजदृष्टेरु
रसिस्वमाननंनिधायतस्याःस्फुचिरंचुचुंबसः॥हृदिस्थितंमन्मथजानवेदसंमदीपयिष्यन्निवफुल्लनासिकैः॥५०॥त
थाहिचक्रेचटुभिर्मनोहरैःमन्नक्तिभिश्चप्रणयीनिजप्रियां॥यथासरागामदनोत्सवेघसौनर्मापिनाचचपयानिधूनया॥
५१॥निरस्तदीपेनिविडेनमोभरैरुदर्चिरिंद्रोपलमंडितेगृहे॥निवेश्यकांतोशयनेमहीपतिश्चकारतच्चेलविमोक्षमा
दिमं॥५२॥सहाभिलाषंसभयंसकौतुकंसपीडनंरातिरुचंसमूर्छनं॥सवेपथुश्वासनिदाघसंभ्रमंसघामनंचानुचभूव
सारतं॥५३॥विधायतस्यारतमादिमंपतिःस्मयन्निमामाहननाननांबुजां॥कथंत्वयासेचनकोगिलुप्यतेचपानसंभव्य
पिहृष्टपारया॥५४॥रतक्रियामोदभृतेविकस्वरेसतित्वदीयेहृदयाब्जकोरके॥कुनस्वपानश्यतिनत्वदाननसपाकरा
हृशेनकारिकालिका॥५५॥चिरंपरिण्यापरिशीलिताप्यसोजहातिनर्द्वाभरमस्यकेलिषु॥इतित्वयामानिनिमास्मभू
यतस्फुटंसर्वांगिःपरिहास्यमानया॥५६॥इतिप्रियेवादिनिवेदिकोदरीस्मितप्रभास्फुदरमास्यमंडलं॥विनन्वनी
किंचिदचीकरद्दृशोनृपस्यपंचामृतसारपारणां॥५७॥नपारयेहंभवदंतिकाश्रयेत्वयेवमस्यार्थमुपेष्यनामिति॥जु
हावकांतंमुकुरंघ्रिणेवसाविलज्जिनाभूमिविलेखनच्छलात्॥५८॥ततोनिजोत्संगतलेनिवेश्यतामुपेन्यपार्श्वंकमि

नानतानना॥ मनिमनीकेक्षणचुंबनादिभिश्चकारदक्षःपरिशील्यनिस्त्रपां॥ ५९॥ सलालयित्वाचिरमंकपंजरेचबंधनस्या
त्हृदिह्यदेमीदृशं॥ यदेतिनापद्यपिसंपदिक्षयंवनेविनाकेपियतोनुगछति॥ ६०॥ अधिप्रभानंदयितस्यमंदिराहिनिर्यतो
सासहसाव्यहस्यत॥ विलोकयस्वर्णघटेकलानयांविधोरिनिस्यश्चचोभिरालिभिः॥ ६१॥ प्रियास्यनांबूलरसारुणेहृ
शौसखीजनेपश्यतिसस्मितंवधूः॥ स्फुटंकराभ्यामलकावतंसितप्रसूनरेणोरपराधमभ्यधात॥ ६२॥ विनीतिभाजे
वविनेतुरंतिकंनयाभिसस्वेनकदाचनान्यथा॥ नथाचतस्याजनिनचनिस्फलाप्रवर्धमानाप्रियताननभ्रुवि॥ ६३॥ अ
जस्रमस्योरसभागपक्षिनेःसहस्रनेत्रःस्फुहितत्वमापन॥ निमेषकालोपिवियोगवासिनोविकल्पिनस्तेनसकल्पक
ल्पतः॥ ६४॥ पिबत्यमुष्मिन्नरदनछदं मृदुन्यधायतकुंचितयानयाभ्रुवा॥ रराजरागावशरासनस्यनद्यनिंनि
स्वायुधदंडवक्रणा॥ ६५॥ प्रियामुखेदोरमृतंधयन्नयंचिरायकांतानविरंतुमेहत॥ अनोरुषेवप्रमदापिपाणि
जैरमुष्यपार्श्वेविररादकोमलैः॥ ६६॥ ललाटमोलोकरमेककंधरश्चकारतस्याश्चिबुकंपिचापरं॥ उभावभातामा
भितःस्फुधाकरंपरस्परसंनिवेपंकजेहगत॥ ६७॥ निवेशितेचुंबनलीलयामुनाकरेशिरस्यंबुधिमेखलाभुवः॥ नि
जामुखेनांबुरुहानपत्रिणास्फुटाक्षतेवाननसार्वभौमता॥ ६८॥ निधायमध्येचिबुकस्यतर्जनींसनोलयामासश
नैर्मृगीदृशाः॥ स्मिनामृतंस्यंदयवक्त्रचंद्रिकादिनीवलोल्यात्स्नहिनःस्वचक्षुषा॥ ६९॥ महीभृतांयःपरिहाप्यधीरना
मचीकरत्नानकरदानमात्मनः॥ सएषदृष्टानदुरोजभृभृतोविमुक्तधैर्यंकरदत्तमेयिवान॥ ७०॥ समुद्रकांचीदुहि
तुःस्तनद्वयंसमुद्रघृणामधिपोनरक्षतेः॥ समुद्रयामासनदानदावभोसमुद्रतस्वर्णघटीवविद्रुमैः॥ ७१॥ उरोजसं
श्लिष्टचितंचितन्वनिक्षिनीश्वरेसाक्षतमंदसोत्कतं॥ चुचुंबतस्याधरमप्यनेननत्सरवातसमारब्धविधेर्य्यरम्यत॥ ७२
दुकूलमाकर्षतिवल्लुभेसनीनिलीयतस्यैवतनोत्रणायिया॥ निदाघतोयोदयगाढसंगतेरदःप्रतीकैरखिलांगमाहृणो

त॥ ७३॥ परास्तपारावतकूजितेरुतैरतेनितांतंपतिकर्णयोरपि॥ ववर्षपीयूषरसंरसात्मजानकेवलंनइसनेधरार्पणा
त॥ ७४॥ पपौविशंकंवरुधास्फुतास्फुधांतदाननातृप्तमिनस्यमानसं॥ असंगतिश्चेतसिभृण्वनामिदंनिरस्यतेनतृ
दयाप्रथकृतया॥ ७५॥ चिरायचेतोभवकेलिसागरेतरंगलीलामनुभूयदंपती॥ विलोचनोन्मेषविलोपरोपणक्षमंश्र
मंतोस्फुतरामवापतुः॥ ७६॥ अस्खलनिश्वासपरंपराकिरासंकुचत्स्वेदकणांकिताननौ॥ मुहुःकृताचुंबनमंतरांतरा
सबाजयामासचिरंजलार्द्रया॥ ७७॥ रतश्रमस्विन्नकपोलमंडलंविलोकयंतीमुखमस्यसुंदरी॥ निजाधरेविद्रुमभा
सितद्दैःकृतंयदागस्तदवागमत्स्फुटं॥ ७८॥ विलोक्यचक्रंकरदर्पणेनिजंस्मचक्रियामाचरतिक्षितीश्वरे॥ विलो
चनांतचरलक्ष्मनीनिकंमुखंमृदुस्मेरमनामिकांतया॥ ७९॥ ददर्शपश्यन्नपितत्कलेवरंचुचुंबचुंबन्नपिनन्मुखां
बुजं॥ अजस्रमालिंगिनवानपिप्रियःस्मनोपपीडंमुकुरालिलिंगनां॥ ८०॥ रतश्रमालस्यभृतोमहीभृतोनिदाघभूरस्र
शमेनिदानना॥ दधेदधानैरपिकोष्णतामहोनदीयनासापथिकैःसमीरणैः॥ ८१॥ श्रमापनोदायशशांककोमलं
तदंगमांशोरसिसन्निधायसः॥ असिस्वदस्तन्मृदुनांयदातदाचुकोपनाभ्यांपुनरप्यनन्यजः॥ ८२॥ रसातिरेकस्य
रसातिवेलतांगतोननांग्याःश्रितकांतवक्षसः॥ विनेतुमेनांपुरुषायितेरतेमनोभुवादिशिकभावमापितः॥ ८३॥ य
थेष्टमस्यामपशंकमत्वरंरतक्रियाविक्रमभाजिभूपतेः॥ चिरायचूतायुधपीडनासहंकृतार्थतामानिबभूवमानसं
॥ ८४॥ विदग्धवेश्यास्वपिविद्यतेनयाप्रकाशितासारतिचातुरीनया॥ संदेवसारस्यसरस्वतासुनासहास्मिकांया-
स्फमनिःप्रतीष्टति॥ ८५॥ चिरायभावंपरिमृत्युघोरसंश्रमातिरेकादलसाखिलेंद्रिया॥ जगादुरस्येवपरस्यसुंद
रीशयालुतांशीतलितेनदंतरा॥ ८६॥ मुखाब्जमीषन्मुकुलीकृतेक्षणंमुहुर्मुहुश्चुंबतिवल्लुभेवधूः॥ प्रपन्नसंज्ञा
तदनुचपाबलाद्विहायशय्यामपिसावसत्क्षणं॥ ८७॥ विकीर्णमालाकबरंकचोत्करंविभिन्नहारस्फुरितंप

योधरं ॥ अपिश्रमांभः स्फुरगंमुखांबुजंनिरीक्ष्यदृग्भिंयतुर्ननदृशोः ॥ ८८ ॥ उद्दंडसंमोदमथोयथापुरंप्रियस्यपार्श्वे शयितापिसुंदरी ॥ विचिंत्यसाकेवलमात्मसाहसंप्रियाननंमेक्षितुमक्षमाभवत् ॥ ८९ ॥ अतिश्रमांतौचिरकाल-खेलनात्परस्परश्लेषसमर्पितांगकौ ॥ स्फुरत्स्वरूपांतरमेघमूर्छनश्चिरस्यनिद्रामथगछनःस्मतौ ॥ ९० ॥ प्रभात कालेप्रथमप्रबुद्धया विचुंब्यमानेस्फुटमाननेनया ॥ प्रबुद्धवानप्रथमप्रबुद्धचक्षिगयशेतेस्मस्फुरत्पुभावुकः ॥ ९१ विहायशय्यांकथमप्युदंचनिप्रभाकरेकेलिगृहाद्विनिर्यतौ ॥ नृपेणपश्चादुपगम्यसत्वरंनिवर्त्यसाहारिविचुंबिना चिरं ॥ ९२ ॥ विलोलकेशावलिकीर्णमाल्यकंकशांगरागंकरजक्षणांकितं ॥ बभूवतस्याःपरिमर्दविभ्रमंमुदेसखी नांचपुरन्वहर्मुखं ॥ ९३ ॥ वियुक्तिरावश्यककर्मकालिकीतयोरभूत्केवलमेकभावयोः ॥ अवापतुस्नावनएवदंपती नवेनवंप्रीतिभरंसमागमं ॥ ९४ ॥ मिथःकृत स्वैरकथारसामृतैःपुराणकाव्यादिविलोकनैरपि ॥ स्फुज्जानसंगीतमुखा भिरव्युभोकलाभिरेनोदिवसानिनिन्यतुः ॥ ९५ ॥ इत्थंनयोर्विहरतोरितरेतरेणस्वछंदमेवगणगच्छमनीतमासीत् ॥ उद्वेलमन्मथविलासजलाशयोद्यद्वीचीवशंवदहृदंबुरुहोरजस्वं ॥ ९६ ॥ आरामेरमणीयपादपलतानेरंतरीचंचु रेसानंदंसरसीषुसारसवनीसौरभ्यरम्यास्वपि ॥ क्रीडाशैलशिरःस्फुरत्वरशिलासंस्तंभितांभोधरेधन्यचापिम-नोहरेवुसनयोरमेयथायोषितं ॥ ९७ ॥ इतिकोविदचक्रचूडामणिनायुवराजेनविरचितेश्रीरामचरितेमहाकाव्येतृ तीयःसर्गः ॥ ७ ॥ ७ ॥ ७ ॥ तदनुभूदनुभूरिपुनायकंसहितमाहितमाननयानया ॥ सरसमारसमानसुपास्तनं हृतरसानरसानतिरार्तवी ॥ १ ॥ प्रथममासमधुर्मधुपांगनामधुरगाननिदानसमृद्धिमान् ॥ प्रमदकोकिलकोमलकाक लीविलासितालसितास्विलमानसः ॥ २ ॥ सहृतमालनमालवनावलिस्फुटसमीरसमीरणमेक्षत ॥ अतिरसेनर सेनस्फुतामधुंविमनतामनतामनिभाषणः ॥ ३ ॥ चपलपल्लवचंपकमंजरीपथिकमानसपल्वलकुंजरौ ॥ विलसतिस्म

विलासवनीदवानलसमालसमानशिखावलिः ॥ ४ ॥ स्फुरुनभागयमेकनमःपरंवननरुस्नवकेषुविकासिषु ॥ अनुबभूव नयोमलिनात्मकभ्रमरयामरयानहृतांब्यथां ॥ ५ ॥ अचिरशैशिरविक्रमशोषिताकमलिनीकरहाटकशोषिता ॥ अजनिन वनर्वानदलोल्लुसद्विमलकोमलकोरकभूषिता ॥ ६ ॥ भवसनिभणयावसयेकथंश्वसिनिवालवधूरिनिदुःखिता ॥ उ चितमेनदिहस्फुटिनांबुजावननदीननदीर्घमाशिश्वसत् ॥ ७ ॥ नवरसालदलावलिपावकेभ्रमदलिबजधूमसमावि ले ॥ परभृताकुतिमाधिनमाधवःस्फनयनाःनयनायविलासिनां ॥ ८ ॥ कलकलःकलकंठमुखोद्गतःश्रवणगोचर भावमनायियेः ॥ निजवधप्रसितस्यचस्मृद्गतध्वनिरमानिरमाननयस्यनेः ॥ ९ ॥ विधूतनेकविधागमवेदिनाःस्मम नसःस्वलुमाधवयोषिताः ॥ पदमकुर्वनयामियमुन्मधुद्रवस्फधावस्फधास्फरभूरभून ॥ १० ॥ निजविलोचननीरुह हार्पणादनिरसस्मिमनेरिहकेर्जनैः ॥ कुसुमचापसरंवनस्फरवासिनंविधिनमाधिनमानमनेहसा ॥ ११ ॥ नरुणपल्लु वनाम्रपुटेस्थितंमकरकेतनलिंगमिवालिनं ॥ अभिषिषेचमरंदरसामृतैर्नवलतावलतापनरत्नभं ॥ १२ ॥ चहल सौरभरंजितदिङ्मुखावकुलशाखिलनामनिकामिनः ॥ अतनुतागनषट्पदपेशलस्वनमिनानमिनावरवर्णि-नीः ॥ १३ ॥ स्फरभिलानिलसंहितवेपथूवनलतावनिताचमहोद्यमं ॥ विदधनुयुगपनसकलंजगद्दशयिनुंशयि नुंदयितेनचा ॥ १४ ॥ महिषपचकलत्रहरिद्भवंमरुतमाश्फनिपीयवियोगिनः ॥ तदनुमेलनएवनिशयनंश्वसिनमा सितमात्मनितन्यनुः ॥ १५ ॥ इतिमधोवनसीमनिनृभिनेप्रियतमासहितः सनुनिश्चयं ॥ अनुभवन्ननिपेशलतानि धिश्चिरमनोरमनादिनकोनुकः ॥ १६ ॥ भ्रमरयोवनगानलयाभवनपरभृतानकनादिनिकानने ॥ मलयमारुतचा रुतमाधुनवृतितंतिसंभृततांडवं ॥ १७ ॥ इतरपुष्टवधूमुखरध्वनिस्खलितपल्लवमंडितभूतले ॥ सकलदिक्कल दगाद्विस्फगंधिनावमनवामनवागमशोभिते ॥ १८ ॥ निजसरवोदयदर्पितमन्मथद्विगुणिताधरपानरसावुभौ ॥ करण

संचयनिर्हृतिमापतुश्चिरतरंरतरंहसिनिःसहो॥१९॥अशुचिनायदिकेलिवनेकथंशुचिरसौविहरिष्यतिभूपतिः॥तदु
पयातुभवानितिकिंतनःशुचिरवाचिरवाच्चितपद्मदः॥२०॥भजतिकल्पमिनःमतिपद्मयंसदृशतामदसौयभुजोष्म
णः॥उदभवत्तरसशुचिःपुरतस्तोनरपतेरपतेजितविद्विषः॥२१॥अजनिनस्यपुरःखलुमाधवःरुमनसामुदयस्यवि
धायकः॥प्रियतमाविरुजोकिमतःशुचिंगदमंदममन्यतमानसं॥२२॥अवरजोपियदिप्रबलोभवेत्परिभवायनृ
णामितिदर्शयन्॥अधिकजृंभणभाजितनःशुचेःसपदिसंपदिसंकुचितोमधुः॥२३॥विपिनराजिवभृकुचभारनामुप
गतोयकर्षातनपादपः॥मरकतोपलरेणुसमेमःरुमेरुदलसद्दलसत्कुरुमंधयेः॥२४॥अविभरुःकलिकानवमल्लि
काजलधिनोपलनाइवमुक्तिकाः॥प्रसभमत्रनिपीयनिशोष्मणाभुविगनाविगनाविदधत्यपः॥२५॥नपकृतोनपनो
पिनिशातपैरविरतंनपतिस्मजगच्चयं॥अपतनिःपतनांतृषिनाभृशंरुदितमादितमानितचारिदा॥२६॥अजनिचि
त्रमिदंमदनोष्मणाविहितसंज्वरमब्जदृशांहियत्॥उरसिजद्वयमूष्मभृतोभृशंवरतनोरननोदनिनिर्हृतिं॥२७॥च
रुमतीमपिमाधवबल्लभोविरहितामसुनाल्पतपत्तपः॥मृगदृशःपुनरिष्टवियोगजज्वरवतीरवतीतिनुकाकथा॥
२८॥दिनमुखेघपिदिक्षुरुदुःसहंकिरतितत्वरयोकिरणद्वजं॥सलिलखेलनमेवनतःप्रियैःसनतमाननमा
नवतीजनः॥२९॥नरवरोपिनिषेवितुमागतंपरिसरोपवनोपहितश्रियं॥सदकरोदृतुमेनमुदारधीरसदृशाःसदृशः
पदवींनयन्॥३०॥मलयजद्रवसारविलेपनाद्गुणशीतलभावसुगंधिना॥विधृतमोदमरंस्तससंततंस्तनयुगेनयु
गेवमृगीदृशः॥३१॥परिलसत्तृणशून्यमनल्पिकापरिमलावहमारुतसेवितः॥व्यहरदंघवनेषुसरःसखासहन
याहृतयामदनेषुभिः॥३२॥तदनुतस्यपुरोभुविभूपतेरखिलनापनिवारणपेशलः॥उदभवन्महिमामहितोजनै
रमृतोरमृतोदयकारिणः॥३३॥अभिनवैरुदजृंभितनभःस्थलंजलधरैरुपगूढतडिद्गुणैः॥नरपतेर्नगरीबहि

रंगणेकरिवरैरिवरैमयभूषणैः॥३४॥मघवकार्मुकमंडितमंबरेमुदिरजालमुदीक्ष्यशिखंडिनः॥नदुपमारसि
काइवपिच्छिकाभरमुदारमुदापरितेनिरे॥३५॥हरिणनाभिरिवारुणरूपयाकृतरुचिर्नवकुंकुमरेणुया॥हृदि
नृणामधिकंजलदावलिर्मुदमरादमराधिपचापिनी॥३६॥अभिनवाभ्रलसद्विसकंठिकाकपटकेशिकभूषि
तमल्लिका॥जलदकालविभूतिवधूरियंव्यननुतानुतापगमंनृणां॥३७॥अबलमारुतवेगसमीरितासक
लदिक्षुजवेनविसर्पिणी॥घननतिर्धरणीभवनोपरिभवितनाविननानविनानभां॥३८॥पतिनमभ्रमुरुवाद्यदिं
दुभिःपथिकलोचनवारिकणैःसमं॥अवनिरेणुरपिप्रमदारुषाव्युपरतापरतापविधायिनी॥३९॥दिनकरायघ
नैःस्थगितात्मनेकथयितुंकिमुवारिजविद्विषं॥सपदिहंसगणोदिवमुद्ययावसरसःसरसःकलुषोदकात्॥४०
अगमयद्घनिनाबहुदूरगंप्रियतमंचलमानसमुत्सुका॥पतगपंक्तिमपित्वरितंरुधासमसिनामसिनांबुधरावलिः॥४१॥तदिदमिक्षनवारिदवारणाच्युतशिरःस्थलमौक्तिकसन्निभाः॥अलमकुर्वननिर्जितताकमक
रकाःकरकाःपृथिवीतलं॥४२॥श्रवणदुःसहशब्दविजृंभितंनवघनंनलिकाभमवेक्ष्यवै॥दिविपदोमृगयामिवन
र्कयद्विकुलमाकुलमायतलीलनां॥४३॥चिरपिपासितचातकमंडलीगलबिलाध्वनियद्गलितंपयः॥तदिदमेवजले
नुपयोमुचाममृतनामृतनामनयन्निजां॥४४॥मदनकुंतममन्यतकेतकीमुकुलमत्रनिशातशिखंजनः॥हृदयकुंत
नलग्नमयोगिनामचपलंचपलंभ्रमरंनतः॥४५॥उपगतेरशरीरनिपंगनामुदितसौरभरंजितदिङ्मुखेः॥अभिनवस्त
बकेरिहवीरुधामनवमानवमालतिकाबभौ॥४६॥निखिलनापनिवारिणिवारिणिस्रवतिसर्वतएवविहायसः॥अ
तिशयंपरिनापमदीधरद्धरवधूरवधूनवरानतु॥४७॥तिमिरकोतिनिरस्करणक्षिपंवियतिवीक्ष्यवियोगवतीघनं॥
सपदिचेतसिजीवितमस्फुरन्मृदुरवाद्रवापममन्यत॥४८॥नियमिनांमनसेवनकेवलंचस्कधयासमवाप्यपरा

गना॥अहिमरोचिरदर्शनकारिणाघनचयेनचयेनहृतंनभः॥४९॥उपगतावतवायसपेयनामुपचिनाघनवारिभि
रापगाः॥प्रतिपथोधिययुस्तटपातनाकलुषिनालुषितांबुजकाननाः॥५०॥सकलसस्यसमृद्धिसमेनयानवधनो
दयशोभितयाहिधा॥अजनिसाजनचेतसिहृष्टतावरुधयारुधयापिनयादृशा॥५१॥इतिविहायसिदत्तपयो
धरामृतुविभूतिमुदीक्ष्यमुदाददौ॥जनकजापिपयोधरमात्मनःप्रियतमायतमालसमत्विषे॥५२॥स्फुटकदंबक
दंबसमीरणसमुदितःप्रिययासहपार्थिवः॥निशमयन्नधिचंडकिरणांमृदुमसरणानसरणानकृतुमन्वभूत॥५३
नवघनेधृतिभागथकेकिनीसपदियत्रभविष्यतिशोकिनी॥शरदमक्षिभिरर्थपतेरिमामुपपुरंपुरंकुरितांजनाः॥५४
मथममेवरुरोधपयोधरान्मृगदृशामिवयौवनपूर्णता॥शरदसौप्रियनामपिबिभ्रतोजनिभृतांनिभृतांवरमुद्यतः॥
५५॥विमलवर्षजलैरचिराद्भुतंविगमितांबुदकर्दममंबरं॥परिदधुःशरदाहरिदंगनाधवलितंवलितंस्फुटतारकं
॥५६॥अननितोद्यनरेणकरेणयःसकललोकमरंजयदंजसा॥नृपइवाभिनवोरविरावभोभृशमयंशमयन्नजडा
तांनृणां॥५७॥विमलचंडविमृल्वरचंद्रिकाविशदकंचुकगुप्तकलेवराः॥उपययुर्मदनस्यसहायतांरजनयोजनयो
धनकर्मणि॥५८॥दिविमुनिर्दहशेकलशोद्भवःकलुषनामपहाय बभौपयः॥मृदुययुःसकदीक्षनसंकनाभुव
नपावनपायसआपगाः॥५९॥कुरुकमसायकसायकरूपनांदधतियेसुकुलाःसरसीरुहां॥सरसिनेरसिनेरथ
जृंभितंसरसिनेरसिनेरलियोषितां॥६०॥परिमलातिशयानुभवादरस्तिमितसंगनभृंगकुरंगभृत्॥कमलमुज्झसि
तंसितमन्वगात्प्रियमकरंमकरंदरसामृतं॥६१॥जनितकोकनदानिजलाशयेशरदिकोकनदानिचकाशिरे॥यु
वरुरोजिनकामशिलीमुखाःसमुदितासुदिताश्चशिलीमुखाः॥६२॥कमलमेचसदाहृदिकुर्वतांधवलपक्षस १२
माश्रयरुश्रियां॥अभिजलाशयमंबरमार्गतोनिपततांपततांकुलमाबभौ॥६३॥ततइतःपरिचभ्रमुरुन्मदाःकम

लकोशलसन्मधुलोलुपाः॥अमृतलालसयेवरुरासुराःसकलहंकलहंसमधुव्रताः॥६४॥मदविकासिमरालवि
लासिनीमृदुरवैसनिमोनमुपेयुषीः॥कलयतिस्मजनःकिलकेकिनीःकुमुदिनीमुदिनारजनीरिव॥६५॥शरदिपुष्प
वतीमपिपक्षिनींनविजकुर्विमलाअपिनेहिजाः॥यदतिरंजनमत्रशरीरिणांमनसितेनसितेनविवेकिना॥६६॥कुमुद
कोरकनारकितांभुवंविमलतारककोरकितांदिवं॥अकलयत्परिवृत्तगुणेनृपःसशरदाशरदावदवानलः॥६७॥मदन
वारणधीरमदस्खलैःपिशुनगंधमशेखरयद्वधूः॥विषमपत्रमहीरुहसंभवंत्रसवमासवमादिनपद्मदं॥६८॥नरपतिः
शरदंगनयाहृतंनिजवनोनमुदीक्ष्यमुदान्वितः॥दयितयासहरंतुमथात्मनश्चरणचारणचारुचकारनत॥६९॥प्रचुरस
स्यपचेलिममंजरीकपिशितामचलामवलोकयन्॥व्यचरदेषचिरंविपिनांतिकेभृशरसंशरसंहितकांतिके॥७०॥क्षण
मसौमुमुदेकणिकांचलयद्गणचुंचुभिरंचितचंचुभिः॥शुकवधूनिकरैरथनिर्गलद्बुनकपोतकपोतकुलैरपि॥७१॥कल
यताकलमाधनकामिनीकलमनोहरगानममन्यत॥नृपतिनानिजगृह्यकसारिकाविततुनांननुनांवचसामिति॥७२
शरदमभ्युपगम्यशरस्थनैरथयवैरिवशंगिनथार्थिनां॥निजदृशासनिषीयजपावलिंरुममिनाममिनामदधान्मुदं॥
७३॥निशिनिशाकरनिर्मलचंद्रिकाधवलसैकनभूमिषुभूमिजां॥अरमयत्सहितस्यमुपाश्रितोरचितसंचितसंचुरु
हच्छदैः॥७४॥अनुभवंतमितिप्रिययासमंजनमद्दोत्सवदेवनुमृतुश्रियं॥नृपमुपासितुमापहिभागमः शमितकामितका
मेमथहिषां॥७५॥निजपतेरुदयेषुविवस्वतःप्रमुदिताइवभूरिदिगंगनाः॥प्रसृमरैःपरितोहिमरेणुभिःपुलककुज्जाल
कुज्जातरुचोबभुः॥७६॥अनुगतेनतुहिनत्रसरेणुभिस्तनुमतांतनुकंपिनिमारुते॥मृगदृशांनकुचद्वयमुच्चकैरुरसिकै
रसिकैरधिरोपितं॥७७॥उपसियत्कमलच्छदसंस्थितंतुहिनशीकरजालमदृश्यत॥भ्रमकरंनिजशोषणचिंतना
दजनितज्जनितस्यतदश्रुणः॥७८॥विरहिणीतरुणीवदिनेदिनेह्रशतराहृतमर्मरनिस्वना॥कमलिनीकरुणापदमा

दधोहिमद्दनामद्दनामपिमानसं॥७१॥तुहिनसंततिनुंदिलदिङ्मुखेदिनमुखेदद्दशेदिननायकः॥जडिमभारनिपीड
नकातरोधवलकंबलकंचुकवानिव॥८०॥सननसीत्कृतशिक्षणदक्षिणेविरचितेसतिबिंबफलस्मिषि॥अधरसी
मनिद्दमनमारुतेरुषिकारुषिकामुकमत्यजत॥८१॥हिमकरोपिचतापकरोभवत्समसमयःसरसीरुहदेन्यकृ
त॥युवजनेयुवतौविरहव्यथाप्रविधुरेविधुरेधनकेवलं॥८२॥सहसितत्रसमृद्धिमुपागतेशरणमेककमेवशरी
रिणां॥नदद्दनानरविःस्मरदीपितस्त्वरमणीरमणीयकलेवरं॥८३॥इतिविभातिविभावितशीतलेसहसहस्य
सहस्यथमेथिली॥जितकरीरशरीरमरीरमत्स्वकमिताकमिनारमवामतां॥८४॥अथययाद्दतुरेनिकमेतिमः
क्षितिपतेःप्रसितोवरिवस्यया॥अनुसृतःसृतिमद्यजसेवितांचपलमुत्सलमुत्पतिरोधिनीं॥८५॥शिशिरएषस
मेत्यशशिन्विषांस्फमनसामथकुंडलनाजुषां॥अचिरनष्टहिमागमकौकसभ्रमहृतामहृताधिकसंपदं॥८६॥
प्रसवयोर्नवयोर्लवलीलतामभवयोरुभयोःशिशिरश्रियः॥अवददेकनरःसितगंडनामधरभाधरभावमथापरः
॥८७॥इयमहोमहृतिर्मलिनात्मनांविपदियत्परिहायपयोजिनीं॥स्फुटलवंकमशिश्रयदभ्रमध्वनिकरोनिक
रोमधुपायिनां॥८८॥जडिमवर्षिणितत्रजगत्त्रयेनयतिकंपमकंपितमानसः॥रतिपतिःस्मजयायविजृंभणाम
निकरोनिकरोद्यतकार्मुकः॥८९॥रजतचूर्णरुचःस्फुटशाबरप्रसवरेणुकणाःपवनाहृताः॥स्मरयशःशकलाइ
वसंलसद्दुमवनीमवनीमवबिभ्रिरे॥९०॥उपसिहंसमुदीक्ष्यहिमानिकाविपुलवायुरयापरियंत्रितं॥उपवनानिकि
मस्फुचामुचंस्फहिनगाहिनगावलिपल्लवैः॥९१॥निरगमन्नविलासगृहोदराद्युवजनास्तदुरस्फलनोंगनाः॥कु
स्फमबाणशराश्चतदीयतोहृदयतोऽदयतोदनतत्पराः॥९२॥स्फरत्मरस्नस्फरेश्वरसन्निभोरघुपतिर्मणिसौधतले १३
निशं॥शिशिरचोदितमन्मथकर्मणामसहकःसहकन्यकयाभुवः॥९३॥स्थमृदूनसददर्शवनांतसमदःसहसा

लसमूहे॥अथमुनानवचोविषयोयःसमदःसहसालसमूहे॥९४॥अंकुरयन्मथचूतलतानांज्ञानमहास्तवनानि
वसंतः॥यस्यजनाविदधत्यबलाभिर्ज्ञानमहास्तवनानिवसंतः॥९५॥वीक्ष्यदधारवधूःरुचिमुद्यन्मारविधामनसाक
मितारं॥तेनचनस्वनितेरलिचूनामारविधामनसाकमितारं॥९६॥नीलगलोथमुदंदिविवेगादापततोविरलंघनतो
यात॥आस्रवमप्यवनिश्च्यवमानादापततोःविरलंघनतोयात॥९७॥चारुचचारसरःस्फविराजत्काकलिकाकल
हंसमहेला॥कामुकयोर्नजहारनदीभिःकाकलिकाकलहंसमहेला॥९८॥शीतरुजंसमयेचपरस्मिन्बाकुलतोरसि
काशमयंती॥पत्युरशेननिनित्यमनृत्यत्बाकुलतोरसिकाशमयंती॥९९॥शीतकणाःश्रियममनिबद्धाःसौरभयास
रसामुदमार्जन्॥केपिजनालयलीलनयोद्यतसौरभयासरसामुदमार्जन्॥१००॥हृष्टःपिकःस्फनरथस्तरथःशिरी
षाःपुष्पंदधुर्मुमुदिरेमुदिरेमयूराः॥रेजेविकासिकमलंकमलंतुषारोवायुर्लसल्लघुलिकालिकाननंच॥१॥इत्थं
संनतमार्तवोक्रमगतिमत्यद्यमाधुर्यादारामस्यमहीरुहास्फकलिकाःमत्यद्यमाधुर्यया॥रेमेतत्रनृपश्चिरंदयित
यामत्यद्यमाधुर्ययालावण्यस्यद्यताद्भुतांजगतिसामत्यद्यमाधुर्यया॥१०२॥इतिकोविदचक्रचूडामणिनायुवराजेनवि
रचितेश्रीरामचरितेमहाकाव्येचतुर्थःसर्गः॥७॥७॥७॥अभ्यासितंनदनुमन्मथबांधवेनकालेनकान
नमुदीक्ष्यकुतूहलिन्या॥वैदेहराजस्फतयासहितोयमारादारामभारतरसानृपतेःकुमारः॥१॥उद्यानसीमनिचिरंस
रिंसमानःमरणातुमेहनयदानरदेवसूनुः॥सख्यंगनाःकतिपयेसरसाःपुमांसःसत्रावधूभिरनुजग्मुरमुंनंदेव॥२॥कं
दर्पएवकमनीयकलेवरोसावभ्यागतःसहरतिर्निजदर्शनोत्कः॥इत्थंविशंकितमनाइवमोदमानःपुष्टिंचकारपरमांवि
पिनेवसंतः॥३॥स्त्रावासकाननमुपेयुषिरामचंद्रेनीरंजनायनिखिलाधिपतेरमुष्य॥दीपावलीवमधुनाविधिना
मयुक्तांचपेयकुड्मलततिःस्फतरांचकाशे॥४॥मंदानिलोमलयकंदरगर्भजातःसद्यःस्रनंपरिमलंपरिपीयधा

DHYAYA PUSTAKALAYA MEMORIAL

ख्याः॥ मुग्धःकुमारइवपूरितवंशकोडःस्वच्छंदमत्रविपिनेस्फुरितंचचार॥५॥सद्यःमरोहस्फुटभंगेःस्तबकमवाप्तैरक्ति
टकांतिभिरशोकनरुप्रसूनैः॥काश्मीरपंकजनितैःकुचपत्रलेखैर्वेश्यांगनेवविरराजवनांतभूमिः॥६॥शीर्णेपुराशि
शिरद्युतिसद्दोरुवेणप्रत्यग्रनागमथनिस्मवनंबसंतः॥येनस्यदुष्टचरितेनविनष्टचारंपृथ्वीतलंपृथुरिवप्रथितप्र
भावः॥७॥आमोदिनीस्फुटनसःपुरुषस्ययोगादाविभ्रतीतिलकमुल्बणगंधसारं॥आगमवीथिरधिकंसरसंव
वयोषाकेपोनचेतसिचकारविहारयोग्यं॥८॥स्कंधातनभृत्युपचितैःकनकप्रकाशैःगुंछैःस्फुटछविरराजतरा
जद्दसः॥तस्मेदशाननविनाशमपेक्षमाणेदर्पोबलिःस्फुरजनेरिवरत्नसानुः॥९॥कल्लोलिनीवुकमलानिविक
स्वराणिभेजुर्भ्रमद्भ्रमरमेचकितोदराणि॥आलोकितुंमनुजभर्तुररण्यलीलांतासामिवप्रकटितानिविलो
चनानि॥१०॥कालुष्यहारिवचसःकलिकाकदंबमालस्यकोकिलगणःसहकारवन्याः॥मीनिंपरामुपजगामय
थाहिलोकःसान्निध्यमात्मनिगिरामधिदेवतायाः॥११॥दृष्ट्वावनंबहुलपुष्परसालसालंबुद्धिर्नकस्यभवति
स्मरसालसालं॥आविभ्रकारसमजौपिनदापभूनोभावंमनोभवहृतंदयितानुवर्ती॥१२॥नीरंध्रशाखिपरिशी
निनिम्नगानांतीरेनिषद्यहृतचर्विनचर्वणानां॥आघ्राणचुंबनकरःसनतंमृगीणामुत्थापनार्थमुदयुंक्तकुरंगसार्थः
॥१३॥सौरभ्यपुष्कलितपुष्करपुष्करायांकोडद्रुयंद्विरदयोरथपुष्करिण्यां॥तत्पुष्करैरहृतपुष्करसंगृहीतैर्व्यत्युक्ष
णंयदिहदुष्करमन्यसत्वैः॥१४॥अंगस्पृशिश्रमणथिनिनवल्लानुरागंचुंकारमंकुरयतिस्मरयांगकन्या॥श्वेतछद
स्यविधुतछदचामरेणप्रासेवनप्रियतमांस्फुरतश्रमार्त्तां॥१५॥उद्दीपिनंवनमिनिक्षितिपालकेतुःसत्कर्तुमेहृतस
मेत्यसमीक्षतेशः॥संभावनाभवतिमाधवसंश्रयाणांकेषांनकुचनकदानकृतोनलोके॥१६॥उद्यानपालनजनेन १४
पदिष्टवर्त्मासद्यःस्फुटप्रणमनेःसदयावलोकः॥अंतर्विवेशविपिनस्यविशांमधीशःशृंगारयोनिरपिचेतसि

नावरस्य॥१७॥तस्मिन्विशत्कपवनीमवनींडमूनोकार्यद्वयेयुगपदेवबभूववायोः॥चक्रीवभूकुरुमवासविमोचने
चश्रोत्रिछिद्रव्यजनकर्मणिचाधिकारः॥१८॥तस्मिन्चिरंतनरतश्छदपादपाली संरुद्धभास्करकरप्रकरप्रसारे॥ज्यो
तिर्मयेनवपुषावरुधाधिपस्यक्षीणंतमिस्रमभवत्चिरलब्धवासं॥१९॥संदर्शितानधिरूढेनरतिप्रधानानमंदे
नरप्रसवभूतिविभूषितांगान्॥पश्यन्नसौविटपिनःपरिरब्धवल्लीर्नुद्यत्कुतूहलमतिःस्फुचिरंचचार॥२०॥साकंवि
देहतनयापिसखीजनेनप्राणेशमार्गमनुसृत्यपयोजमूर्द्धा॥आगामिनोगहनकाननधावनस्यत्यागेवशालिनुमिवप्र
चचारबाल्या॥२१॥नीरंध्रपल्लवशिफानिभृतप्रकांडसायंतनाभ्रसमशोभमशोकसालं॥देवःपुरेभुविददर्शसद
र्शनीयंकामस्यदृष्यमिवरक्तपटीनिबद्धं॥२२॥यःसंपदास्फुटनसांनिजनामयाच्यंकोनाविषोगविधुरंजनमानयो
नि॥रेक्ष्वाकवंशनृपतिःकमनीयशोभमेक्षिष्टनंकुरवकद्रुममग्रदेशे॥२३॥दृष्ट्वानृपस्तमचलाकुचकुंभसंगमभ्य
र्थयंतमिवषट्पदकाकुनादैः॥स्मित्वामनागनुचरद्दयितामुखेंदोर्व्यापारयद्दलिनकंधरमस्तिकोणं॥२४॥केवर्न
वृत्तिमवलंब्यमनोभवेनक्षिप्तंवनेबहिरशमयल्लगद्भिरंकं॥अंतर्विसारमखिलस्यजिघृक्षणेनशंकांचकारसनि
रीक्ष्यपलाशपुष्पं॥२५॥चामीकराभमपिचंपकमुग्रगंधंदूरेऽस्मिन्मधुकरैरमृदितान्यपुष्पैः॥आलोक्यभूपतिर
चिंतयदंतरेवंकूरत्नमेवकुरुतेनरमप्रभृत्यं॥२६॥पंचायुधस्यशरपंचकमीक्षणाभ्यांप्रत्येकमस्यपपुषोपिनचि
त्तभीतिः॥भेत्तुंपुरेवहृदयंनहितस्यशक्तिर्यत्तेयसीसहचरीमदाकुलस्त्री॥२७॥आलंबितेहिजकुलेनविरे
चमानेबालातपद्युतिमुषानवपल्लवेन॥आम्रातकंमनिननंदवसंतलक्ष्म्यास्तास्राधरंमुखमिवप्रकटंनजेशः॥२८
संभावनीयमभिरूपजनेनमूर्ध्नापुष्टैरमेरुपचितैरुदयत्सरार्थं॥हृद्यंकवेरिवयचःकलधौतवर्णंपृथ्वीपतिर्निर
वद्यवर्णनकर्णिकारं॥२९॥सज्जन्मधुव्रतमधीहृतमध्यशोभंनिर्मांसुवंशतिलकस्तिलकंविलोक्य॥कस्तूरिका

